दिनाङ्क :05.06.2025

प्रात: - 06:55

<u>प्रधानमन्त्री-वृक्षारोपणं</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य विश्वपर्यावरणदिवसावसरे नवदेहल्याः भगवान् महावीरवनस्थली-उद्याने 'एक् वृक्ष मा के नाम्' इति उपक्रमस्य अन्तर्गतं विशेषवृक्षारोपणस्य अभियानस्य नेतृत्वं विधास्यति।

अभियानमिदं 'अरावली-हरित-भित्ति-परियोजनायाः' महत्त्वपूर्णं अंगं अस्ति, यस्य उद्देश्यं अरावली- क्षेत्रे पुनर्वनरोपणं वर्तते।

श्रीमोदी पर्यावरणसंरक्षणार्थं, वनीकरणार्थं च भारतस्य प्रतिबद्धतायाः प्रतीकरूपेण वटवृक्षस्य रोपणं करिष्यति। सुस्थिर-नगरीय-गतिशीलतायाः प्रोत्साहनाय प्रधानमन्त्री दिल्ली-सर्वकारस्य स्वच्छ-परिवहन-उपक्रमस्य अन्तर्गतं द्विशत विद्युत्-बस्-यानानां कृतेऽपि ध्वजारोहणं करिष्यति। एतेषां विद्युत्-बस्-यानानां परिचयस्य उद्देश्यं नव दिल्लां वायु-प्रदूषणं न्यूनीकर्तुं, हरित-परिवहनं स्वीकर्तुं च वर्तेते।

अवधेयास्पदमस्ति वर्तते यत् अद्य तावत् विश्वस्मिन् हि विश्वे विश्व पर्यावरण दिवसं आचर्यते।

<u>संसदः- प्रावृट्सत्रम्</u>

अद्य प्रशासनेन आगामिमासस्य एकविंशतिः दिनाङ्कात् आरभ्यमाणस्य संसदः प्रावृट्सत्रस्य सूचना प्रसारिता। एतत् विपक्षीदलानां अनुरोधेन सिन्दूराभियानमधिकृत्य चर्चायै संसदः विशिष्टसत्रं आहूतमस्ति । नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन् संसदीयकार्यमन्त्री किरेन् रिजिजुः अवदत् यत् अस्य सत्रस्य समापनम्

अगस्तमासस्य द्वादशदिनाङ्के भविष्यति। पहलगामे जाते आतङ्क्याक्रमणे पञ्चविंशतिः भारतीयाः एकः नेपालीनागरिकः च मृतः तदनन्तरं भारतेन आरब्धस्य सिन्दूराभियानस्य अनन्तरं एतत् प्रथमं संसद्-सत्रं भविष्यति। भारतीयसशस्त्रसेनायाः प्रतिकारात्मककार्याणि पाकिस्तानेन अधिकृत-जम्मू-कश्मीरे च आतङ्क-स्थलेषु प्रहारं कृत्वा शततोप्यधिकाः आतङ्कवादिनः मारिताः आसन् पहलगामातङ्क्याक्रमणस्य अनन्तरं विभिन्नराजनैतिकदलानां नेतृणां उपस्थितौ सर्वदलीयोपवेशनम् अपि सर्वकारेण आयोजितम् आसीत् ।

पूर्वन्यायाधीश - महाभियोग:

संसदीय-कार्य-मन्त्रिणा किरेन रिजिजू इत्यमुना प्रोदीरितं यत् प्रशासनं दिल्ली-उच्च-न्यायालयस्य पूर्वन्यायाधीशं यशवन्त-वर्माणं विरुध्य महाभियोग:-प्रस्तावस्य आनयनार्थं राजनीतिक-दलानां सामान्य-सहमत्यै कार्यं कुर्वदस्ति।

सर्वकारः जनगणना

सर्वकारः सप्तविंशत्यधिक द्विसहस्र तमवर्षस्य जनगणना द्वाभ्यां चरणाभ्याम् कर्तुं निर्णयं अकरोत्। अवधेयं यत्

जातिगणनापि एतया साकं एव भविष्यति। गृहमंत्रालयानुसारं लद्दाख्-जम्मूकाश्मीर-हिमाचलप्रदेश-उत्तराखण्ड प्रदेशेषु प्रथमचरणस्य जनगणना षड्विंशत्यधिक द्विसहस्र तमवर्षस्य अक्टोबर् मासस्य एक दिनांके आरप्स्यते।

तावत् द्वितीय चरणस्य जनगणना सप्तविंशत्यधिक द्विसहस्र तमवर्षस्य मार्च मासस्य एक दिनांकात् भविष्यति।

## <u>कर्नाटक-आरसीबी जन सम्मर्द</u>

बेङ्गलूरु-नगरस्य चिन्नास्वामी-क्रीडाङ्गणे ऐ. पि. एल्. विजेतृ-रायल्-चालॆञ्जर्स्-बेङ्गलूरु-दलस्य सम्मान-समारोहस्य समये जन सम्मर्दे एकादश जनाः मृत्युमुपगताः। त्रयस्त्रिंशत् जनाः च व्रणिताः ।